CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

॥ सनातनधर्म सभा नं. ३२

सूर्यशतकम्

का॰प्रा॰

२७०२

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

सूर्य्यशतकम् ।

कविवरोपाध्युपनामक काशिक
जयनारायणपाठशालीय प्रधान
संस्कृतपाठशालाध्यापक

श्रीगोपाल शर्म्म विरचितम् ।

श्रीयुतबाबुभुवनचन्द्र बसाकमहोदयस्य
प्रार्थनया तेनैव
संस्कृतम् ।

कलिकाता नगरे

श्रीयुक्तबाबुभुवनचन्द्र बसाक संस्थापित संवादज्ञान-
रत्नाकराख्ययन्त्रे तद्द्वारैव १९२८ संवत्सरे
प्रकाशितम् ।

[निमतला घाट ष्ट्रीट ८ संख्यक भवन ।]

यन्त्रनामाङ्कित मोहर व्यतीत पुस्तक क्रय करण निषेध ।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

श्रीगुरुचरणकमलेभ्योनमः।

अथ सूर्य्यशतकम्।

पतङ्गानां दैन्यं निशिविरहिणां पातकमिव
मयन्नाशं शीघ्रं गिरिमुदयमुद्योतयति यत्।
दिशः सर्वाऽकाशं न यदिवसमुच्छ्वासममलं
पवित्रं लोकानां सुखयतुमहोनः किमपि
तत्॥ १॥ वार्लभ्राः ककुभोमुखं सुखकरः
कुर्व्वन्करैर्भूषितं कोकैः कोकनदप्रभः करु
णयाकोकाङ्गनायोजयन्। दीप्तयादीप इवा
म्बराङ्गणमिदं प्रद्योतयन् श्रीयुतोभक्तानां
मुदमावहन् दिनमणिर्भूयात्मनः श्रेयसे॥ २॥
त्वयोमयोयं द्विजवर्यदत्तान् जलाञ्जलीनाहत
आददानः। क्रामत्यनन्तं भगवान्दिनेशोभू-
यात्सभद्रायसुरार्चितोनः॥ ३॥ तमोविदल
यन्करैः कुमुदिनीवनम्मीलयन् कुशेशयवनं
सुखं सकरुणः समुन्मीलयन्। द्युतिन्द्विगु-
णयन्नथोऽहिमगुरेषसोमेरवीं सुरेन्द्ररचिता
ञ्जलिर्भवतुनः शिवायानिशम्॥ ४॥ रुचि-

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

रभिनवोल्लपामरकताश्म संसर्गिणीर्द्दधद्भिरति
शीघ्रताजितसमीरवेगैः शुभैः। यदीयरथस
प्तिभिर्हरिपदं महत्सप्तभिर्विगाह्यत इदं रविः
स भवतात् शुभायाशुनः ॥ ५ ॥ सुवर्णगि-
रिभूषणं तिमिरसङ्घसन्दूषणं प्रचण्डमिहिका
वलीदलनशिल्पमनल्पप्रभम्। प्रभाभिरभितो
लसत्सकललोकदीप्तिप्रदं शिवायभवताद्रवेर्भु
वनमङ्गलं मण्डलम् ॥ ६ ॥ ऋतूनां पर्यायाः
सकलजनतायासहरणागणान्बीजानां ये विद-
धतिफलाढ्यान् यदुदयात्। भवन्त्येतेलोके
मतितततमः संविघटनं सुबिम्बं तद्भानोर्भ
वतु भुविभव्यायभजताम् ॥ ७ ॥ योगाभ्यास
रता निरन्तरजितश्वासा विचिन्वन्तियत्तेजः
षोडशनाडिकान्तरलसत्क्रान्तरात्माभिधम्।
यद्ध्यानादमलाभवन्ति मतयस्तद्व्यक्ततन्तच्छिवं
श्रीसूर्य्यस्यतमोपहं सदुदयं श्रीमण्डलं शंक्रि-
यात् ॥ ८ ॥ सुवैणवकरीरभान् महतियो-
जितान् वर्त्मनिशुभंयुमुखवल्गयाविहितबुन्दि
लाभान् हयान्। अतीवसरलायताः खलु-
नियामयन्त्यंशुलादिनेशरथरश्मयः सुशुभदाः
सदास्तु शिवाः ॥ ९ ॥ अनाधारं गच्छन्

CC-0 Pt. Chakradhar Joshi and Sons Dev Prayag. Digitized by eGangotri

वियतिजवनाश्वस्तुतवशान्महत्येकस्मिन्योवि लस-
ति सुचक्रेद्भुततमे। शुभारोहश्याभः प्रथि त-
महिमाकाञ्चनमयोधवस्य छायायाः सततमव
तात्स्यन्दनवरः ॥१०॥ दधत्सुशनकप्रभंवपुरल
श्मयूखाचितं स्मिताब्यमुखमुन्दरोमकरकुण्ड
लोहारवान्। सुकङ्कणलसत्करैर्धृतसुदर्शना
द्यायुधः प्रफुल्लकमलासनः कृतसमाधिभिः
सुग्रहः ॥ ११ ॥ त्रिसन्ध्यमशुचिमानसा अपि
जपन्तियन्तद्विदाङ्गणाः समभिवर्द्धकं सपदिते
जसां ब्रह्मणाम्। समर्गदृतिकोर्तितः श्रुति
भिरेषदेवोऽव्ययोयदन्तरगतोरवेरवतुतच्छिवं
मण्डलम् ॥ १२ ॥ युग्मम् ॥ न न्यूनं नहि
चाधिकं नियमतो यात्येषयत्स्यन्दनः काल
स्य प्रणयन् क्षणप्रभृतिकान् भागान् प्रभा-
मण्डितः। लोकानां खलु कार्यसंस्थिति
रियं यानाश्रिताजायतेसोऽयं सं विदधातुलोक
महितः सन्मङ्गलं श्रीरविः ॥ १३ ॥ जिघत्स्
न्मन्देहान्प्रभवति न किं हन्तुमनवोद्विजैर्यद्दी
यन्तेप्रतिदिनमपामञ्जलिगणाः। नकार्यैस्त्वं
भ्रान्तिः विभुरयमधीशोऽस्य जगतोविधातुं
शंक्रीडां रचयतिजनान् शिक्षयति च ॥ १४ ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

तपस्ततौसुगुणाः पयसाङ्गणान् खलु समाद
दतेर्ददितुम्मुनः । जलदजालमिषेण ततो
ऽधिकं रविकराभजतः सुखयन्तु ते ॥ १५ ॥
इयं ज्योतिः पङ्क्तिर्वियतिनियताभूमिमभितः
परिभ्राम्यन्त्यच्छासततममितात्यद्भुततमा ।
यतोमालेवाभां धरतिसुकृतानायकक्षतां सुर
श्रिप्रोता तत् समवतुरवेर्मण्डलमिदम् ॥ १६ ॥
न खलु खचरसंघावन्दितादृश्यादिसंस्थैर्दनुजम
नुजदेवैर्दीप्तिमेवाप्नुवन्ति । अपितुतमवलम्ब्यं सू
र्य्य आकाशमार्गे यत इदमवताच्छ्रीमण्डलं सौ
रमस्मान् ॥१७॥ दधत्त्रिभुवनत्रयं मह्तिमाभि
रामाकरोरथेन महतानिशं गगनमण्डलं
मण्डयन् । प्रयातिरहितः श्रमैर्द्रुतमनूरुसूतो
नुतः सुमेरुभवनैः सदा सकुरुताच्छिवं स्योर
विः ॥ १८ ॥ कमलाव्यकरः कमलाव्यकरः सु
रसार्थनुतः सुरसार्थनुतः । जलजालिसुखो ज
लजालिसुखः सुखमावहतात्सुप्रमावहमः ॥१९॥
रथाग्रमुखगामिभिर्ऋषिवरैः सुदिव्यप्रभैर्जगा
वलियुताद्भुत प्रचुरवाग्भिरत्याशुगैः । सदाल्पव
पुषायुतैः सकिलवालखिल्याभिधैः स्तुतः करुण
याविभुर्भवतुभास्करः श्रेयसे ॥ २० ॥ नैशन्त

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

मोहं हरति केवलमेष ईशो नैवापितु प्रतिदिनं भ
जतां दयाब्धिः। वृद्धिक्षयमस्य जगतः खलु यो नि
यन्ताऽसुरः सदाभवतु भव्यकरः शुभाय ॥२१॥
आत्माऽसौ जगतइतीरितोऽखिलेशो वेदैर्यो बहुस
मभिष्टुतश्च नित्यम्। अज्ञानं तिमिरमिवापहृत्य
भूयात्कामानां द्रुतमभिपूरको दिनेशः॥ २२॥
सुखालोकं दिव्यं जगति सुखदं चाशुभहरं
प्रगे चुम्बत्यम्भोरुहनिकरवन्धोर्नभद्रदम्। सुह
ष्टं लोकानां भवतिशुभदं यद्दिनमणेः कृपा
लोस्तद्बिम्बं सततमवतात्तापहरणम् ॥ २३ ॥
मुखं वेदानां यो विबुधऋषभोऽध्यापिपदलं सु
तं श्रीमद्वायोः प्रपठितुमुपायातमनघम्। रथा
ग्रास्यं यान्तं द्रुतमुदयतोऽस्तावधिहरिं क्रिया
च्छ्रेयः श्रीमान्सततमहिमांशुः ससुतराम्
॥ २४ ॥ उपगीयत एष सुरर्षिमुखैः सततं
सततं सततं सततम्। सुरवर्त्म विभुर्वि
चरन् कुरुतात् करुणां करजालपतिः सुरराट्
॥ २५ ॥ यन्मण्डलन्तपति विश्वजनीनमेतद्यां
गाश्चबिभ्रदखिलात्मगतस्य भानोः। भाभि
र्वियद्विमलयत् सुरराजपूज्यं सन्मङ्गलं दिश
तु तद्भजतां शरण्यम् ॥ २६ ॥ योपी

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

पठन्मुनिवरं खलु याज्ञवल्क्यं कर्णेऽवतः सस्तु
पविष्टमतिद्रुतस्य भागं श्रुतेः श्रुतिनुतो यजुषः
सभूयाङ्गव्याय भव्यकिरणः किरणेन एषः॥२७॥
भक्तं प्रह्वं याज्ञवल्क्यं कृपालुर्भक्त्या स्वप्रस्थीय
मानोऽन्वगृह्णात्। योऽयं छन्दोवाजि यातानु
कारिस्वारं देवोऽधिपोषु सोऽवतान्नः ॥२८॥
लेखानान्दुःखसंघान्धतमसदिनकृत्लीलयामा
नवोजोलोकानां त्रासहेतोः खलु दशशिरसां
छित्त्यैरावणस्य। दुष्टानां गर्वहन्ता दशरथ
तनयो यंनुनावाहवेसावव्यादेषप्रभुर्नः सकलसु
रवरैः पूज्यपादो दिनेशः ॥ २९ ॥ धाम्ना
ध्वामलत्वमसि भगवन् जाग्रद्दृष्टोद्विजानां यस्य
ध्यानादमलतरतां बुद्धिराप्नोति सद्यः। यस्मिन्
प्राप्ते कुधरमुदयं जाग्रति प्राणिसंघाः रत्न्यान
स्मानयिदिनमणेपाहि देवप्रसीद ॥ ३० ॥
भूतानाम्महतां गुणाः सुखकराः पुष्यामह
त्यायुताः पर्य्यायैः सुतराम्भवन्ति सततं यस्यो
दयानामिमे। लोकानां हृदयाणिहर्षयदिदं
पद्मानिवश्रीयुतं तच्छ्रीमण्डलमाशुमङ्गलकरं
भूयाद्रवेर्दीप्तिमत् ॥ ३१ ॥ विकाशीपद्मानां
खलु खचरराशीन् प्रभुरिमानयन्दीप्तिनि

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

त्वं गगनतलमुल्लासयति यः । लभन्तेतेजो
ऽस्मादपिऊङ्गतवहाद्या भुविगताविधेयात्कल्याणं
झटितिकिरणालोपतिरयम् ॥ ३२ ॥ कुग
गनतलगं समं स्म हन्तं मयमयमाहतमोनुदं
जनानाम् । सहगणितविधाभिरद्भुतं यः सभ
वतु नः शुभमङ्गलायसूर्य्यः ॥ ३३ ॥ यत्सिद्धिं
वेदसम्यक् स्म खलुऋषिवरोदुस्तपैर्यस्तपोभिर्ब्र
ह्मर्षित्वं सुलेभे जगति सुविहितं कौशिकोगा
धिपुत्रः । सोयं मन्त्रः प्रसिद्धः श्रुतिषुसुरवरं
ध्येयभावेनवह्नियं सस्तात्कोकभर्त्ताशुभतरकि
रणोमङ्गलायप्रभुर्नः ॥ ३४ ॥ ज्योतिःशास्त्रं
यतइदमापद्भूतिं भूतिं खेभ्योददतः स्वीया
दुदयात् । उदयायहृययालभ्यन्तेलौकैर्लौकैरी
ड्यस्त्रिभिरपिसोऽव्याद्भानुः ॥ ३५ ॥ चरणं
गत्वादेवोविरमतिनसेव्योखजगतः प्रजारच्च
न्नेताः खलु जनयितेव प्रभुरयम् । निरातं
कामोदं यत इह लभन्ते हि सुतरां शरण्यो
लोकानां भवतुशरणं रश्मप्रधिपतिः ॥ ३६ ॥
अरण्यरुदितन्नवैभवतियत्प्रभक्तार्यनाप्रणश्यति
भयं महत् खलु बलाद्यदीयस्तुतेः । सुमङ्गलम
हर्निशं झटितिवर्द्धयन्प्राणिनां करावलिपतिः

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

क्रियाद्दुरितनाशमेषोऽव्ययः ॥ ३७ ॥ यतो
देवेनान्तर्बहिरपि नरिक्तं जगदिदं यतोऽन्त
र्यामि त्वं विदितमखिलान्तः प्रविदुषः । अयं
तेजः सारोमुदमभिदधत्सर्वजगतां विधेयात्
सुश्रेयः सुखतरकरोदीधितिपतिः ॥ ३८ ॥
जगत्सुखकरैः करैः प्रविलसन्लसन्मुनिवरो
वरोदयतनुः । क्रियात्सघमयं मयं दिन
करोऽकरोन्नयविदंविदं यक्षमुराट् ॥ ३९ ॥
परःस्वोवाक्रोपि द्युतिधरनतेऽस्त्यत्रजगति
प्रजाः सर्वाः पश्यन्त्यमरवरतुल्यं यत इमाः ।
तथापीमान् भक्त्यासततमनुगृह्णासि भजतस्त्वमे
वच्छायेशत्वमिव खलु नान्योत्रभुवने ॥ ४० ॥
स्वर्गेसुरेशप्रमुखारसायां द्विजेन्द्रवर्याश्चतले
यदीयान् । गुणान्प्रगायन्तिफणीन्द्रमुख्याः
सोऽव्याद्रविर्नः करुणार्द्रचित्तः ॥ ४१ ॥ जग
त्सर्वं भासानिजमहिमकीर्त्येव दिनकृत् द्रुतं
श्वेतीकुर्वन्नुदयगिरितोनिर्जरपथे । सुगच्छन्
कोकेषुद्युतिकरुणयेवातिघनकैः स्वमातला
गेषु प्रभुरवतुनः सोऽम्बरमणिः ॥४२ ॥ त्वत्पा-
दाब्जं प्रतिदिनमनुध्यायतां बुद्धिरुद्यन्ना
नाविधार्थविरचनातर्कसंदोहयुक्ता । हृष्य

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

त्वम्भोरुहकर विभो हृष्टिकृत्युष्टिकृद्याद्यस्मात्सुत्वं त्रिभुवनपते तां कृपास्त्वां विधेहि ॥४३॥ किरणाकर ते चरणौ भजतां न भवन्ति भवप्रभवा नु गदाः। अतिदीनदयालुतया त्वमये परिपासि जनान् खलु तान् हि सदा। जनतापरिपालनतत्पर हे परितापहरो भव भव्यमुदा। शुभमस्तु सतां त्वयि ये प्रणताः सततं तव वैस्तुतनामपदाः॥४४॥ प्रथिता तव दीनरक्षिता खलु याच् आः विषये तव स्वकान्। सुनियोजयतीति साम्प्रतं किरणालीय सतां हिरण्मयम् ॥४५॥ त्वमेव शरणं सतां त्वमसि देहिनां जीवनं प्रचण्डकिरणालिभिस्तपसि तज्जगद्भूतये। प्रभाकरकरावली विघटिताब्जपंक्ते विभो भवाब्धितरणे तरे सततमेधि गोप्ता रवे॥४६॥ अयं खलु नभोम्बुधेर्मणि रिवोदितः खेचराडटत्यवसरं ददत्सकलदेहिनां कर्मणाम्। सुरासुरशिरोमणिप्रकरदीप्तिनीराजितांघ्रिकोभवतु भानुमान् शुभकरः सनः सर्वदा॥ ४७॥ अन्येषां नैव सिद्धिर्भवति तवकृते मन्त्रराजस्य सिद्धिं मंत्राणां विघ्नवर्यैरतद्दह विधिवज्जप्यते तावदेषः। तत्रापीयं कृपा ते सकलमुखकरी साधयत्याशुसिद्धिं तस्मात्त्वस्मासु तां

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

त्वं कुरुपरमकृपान्देववर्यांशुमालिन् ॥ ४८ ॥
जनुषिदूहकृतानिनैवनश्यन्त्यपितुपुरापिकृतानि
दुष्कृतानि । स्मरणसमयएववयस्यसोजः किरण
पतिर्भवताच्छुभायनित्यम् ॥४६॥ हित्वान्यत्यादि
कर्मत्वयिधृतमनसोलब्धवायुप्रचाराअल्पायासेन
धीराझटितिदिनमणेयोगिनोयान्तिसिद्धिम् ।
तंत्वांयोगेमुनीनां प्रणिहितमनसांक्षेमकारं श
रण्यंस्वात्मारामं दयालुं शरणमदितिजैः
पूज्यपादं प्रपद्ये ॥ ५० ॥ यः शक्यतेश्रुति
भिरेवपरोऽधिगन्तुं किंचित्सुयोगनिपुणैर्हृ
दिचिन्त्यमूर्तिः । उद्भावयन्मनसिसंभजतां
स्वभक्तिं सस्याच्छुभायकरुणाव्यवपुर्दिनेशः
॥ ५१ ॥ मुक्तानां शरणं सुरक्तचरणोवर्हि
र्मुखानां शिरोभूषाभूतसुपारिजातकुसुमच्यो
तत्परागैःशुभः । सोऽयं सिद्धविगाह्यगूढम
हिमासेव्योद्विजाग्यैः सुखोध्युष्यात्तापहरः सदा
प्रभजतां हंसोऽनिशंमानसम् ॥ ५२ ॥ धृता
मोदं पद्मं जनकुलमिदञ्च प्रविदधत्यआशा
भक्ताशाअपिझटितिभासां पतिरयम् । प्रका
शैः कामैर्वं भरति चसदालोकमहितो विधेया
त्सश्रेयः श्रुतिगणनुतः श्रीदिनकृणिः ॥ ५३ ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

जनतानचानुभवतित्रिविधं खलुदुःखमस्यच
रणाम्बुजभाक् । जननीपयःपिवतिनापिपुन
र्भवतात्सलोकशरणं शरणम् ॥ ५४ ॥ विहाय
त्वामन्यान्विवुधवरसेवन्तइहयेमर्णित्यक्त्वाऽनर्घ्यं
करगमपिमोहात्तद्वशः । यतन्तेतेलब्धुं शुभ
वरद्काचं स्वयजिताः स्थितं दूरेपीशस्त्वचर
णर्तितं तद्धितर नः ॥ ५५ ॥ कां दिशीकइव
वेदगणोऽपियद्गुणाल्यवगतौकिमुतान्ये । अप्र
मेयगुणवान्सविदध्यात् शुद्धकर्मसुमतिं भज
तान्नः ॥ ५६ ॥ नमोनमस्तेऽखिलकर्मसाक्षिणे
नमोनमोविश्वजनीनहेतवे । नमोनमोलोकवि
काशकारिणेसमस्तविद्यागुरवेनमोनमः॥५७॥
वेदाभ्यासरतोनतो सुरगणैरप्यात्मभूर्ज्ञानमूर्य
स्यैश्वर्यमियत्तयानिगदितुं शक्तो न सर्वात्मनः ।
सोयं दण्डमुखैः शुभायुधलसद्रूपैः शुभैरन्वितः
स्तान्नित्यं शुभकृत्करावलियुतोनः श्रेयसेभूय
से ॥ ५८ ॥ परात्परन्त्वं जगदेकरक्षिणं त्वणं
रथाङ्गाह्वयपङ्कजानाम् । आवोढुमिष्टं स
कलं समर्थं छायेशमाद्यं शरणं प्रपद्ये ॥५९॥
नमोनमोवाग्विभवातिशायिप्रभामहिम्नेऽखिल
लोकसीम्ने । नमोनमोभक्तभयार्त्तिहारि

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

स्तवायसूर्य्यायनमोनमस्ते॥ ६० ॥ प्रगेऋग्रूपं
त्वामखिलदतुमध्याह्नसमयेयजूरूपं सायं त्रिभु
वनपतेसामवपुषम्। कृपालोध्यायन्तिप्रबल
तरयोगश्चिरहृदस्त्रयोरूपस्तत्त्वं विश्वद्विजगदे
तत्करुणया॥६१॥ यस्मिंल्लेशपयापतन्तिकरु
णासिन्धोकटाक्षाङ्कमेपैयूषोरतिशेरतेसुरगुरो
वृष्टीर्मनोज्ञालये। सोह्नायप्रविमुच्यसंसृति
करीर्दुर्वासनाब्रह्मणोज्ञानंसर्वसुखप्रदं परम
वाप्नोत्येषभक्तस्तव ॥ ६२ ॥ भूयात्तेचरणेरति
र्दृढतरास्माकं सदासर्वदाभूयास्त्वं भजतां शर
ण्यशरणंयेप्रीतवोपासते। भूयासंसततं विभो
गुणगणान्गातुंत्वदीयान्दृढोभानोसर्वसुखावहा
सुमतिश्चत्तेस्यात् प्रसक्तिर्य्यतः ॥ ६३॥ वि
द्यार्थिनां त्वं परमासिविद्याअर्थार्थिनां त्वं पर
मोर्थईश। सुखार्थिनां त्वं परमंसुखञ्चत्वं म
ङ्गलंमङ्गलमिच्छतान्नः ॥६४ ॥ तापान्तरमा
शुमीतश्चयतिप्रीतः प्रभुर्यांवरन्दत्वासावश्वतंसुप
ञ्चतपसोदेवोधरित्रीमिव। सोऽयंसिद्धतपस्वि
सेव्यचरणोलोकेशवन्द्यांघ्रिकोभूयान्नःसवितामु
देप्रतिदिनं दीनावनेतत्परः ॥६५॥ देवाध्व
घण्टापथकुक्ष्यमाध्यमालोकदं निर्जरमाननी

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

यम्। अन्तर्बहिः साक्षिसदातनं तन्मण्डलं सौरमहन्नमामि॥ ६६॥ अगोचरैर्वर्युतायवाचां प्राच्यादिदिग्भागविकाशयित्रे। तस्मै सवित्रे खिललोकधात्रे सुबुद्धिकर्त्रे गुरवे नमस्ते॥ ६७॥ जयतु जयतु शोभाशालिमूर्तिः शुभांशुर्जयतु जयतु युक्तश्छायया वामभागे। जयतु जयतु भक्ताभीष्टदानोरुकीर्तिर्जयतु जयतु सर्वाधारभूतो विवस्वान्॥ ६८॥ श्रुतीनां सर्वस्वं श्रुतिपथगतं तापहरणं प्रसिद्धं जीवातुं जगदवकुरोगप्रशमने। अनाथानां नाथं ह्यनुपममनन्तं सुरवरं भजे देवं सूर्य्यं दुरितवनदावं सुखकरम्॥ ६९॥ असुङ्किलविधुन्तुदस्तुदति दर्शकाले विभुं श्रुतार्थसुविचारिणां न खलु तद्विशङ्कास्पदम्। स्थितिं यदनुपालयन्स्वयमनोश एषोऽव्ययः प्रशास्ति सचराचरं जगदमङ्गलच्छिद्रविः॥ ७०॥ सुधाभिसंस्पृष्टकरांस्तवेमानवाप्य वै यौगिकशब्दवाच्यः। सुधाकरोऽभून्नु निशाकरोयं त्वमेव यत्सर्वगुणाकरोऽसि॥ ७१॥ नमोनमः सत्वगुणैकधाम्ने नमोनमस्ते तमसः परस्मै। नमोनमः संसृतिसिन्धुसेतवे ज्योतिर्गणानां पतये नमोनमः॥ ७२॥ स्तुत्याय नित्यं

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

स्तुतिमर्हतामपिप्रणम्यपादायनतिं समर्हताम्। प्रकाशकानामपिभासकायमहाप्रभावायनमोनमस्ते ॥७३॥ स्वयं स्तुतं त्वामयिदेवदेवस्तोतुं कईर्शीतजगत्स्वरूपम्। छन्दांस्यपीमान्यनुवादमात्रं प्रकुर्वतेयस्यतवस्तुतीनाम् ॥ ७४ ॥

नमोनम खण्डमयूखशालिनेनमोनमोमण्डनमण्डनायते। नमोनमःसत्तनवेनिरन्तरं चिन्मूर्तयेस्ताद्द्रवयेनमोनमः ॥ ७५ ॥ दुष्टेन्द्रियैर्नाथमहैन्द्रजालिकैरिवैक्षिरस्मान्सततं प्रमोहितान्। त्वांवैशरण्यं शरणंगतान्रवेकृपाकटाक्षैरवताद्दयानिधे ॥ ७६ ॥ यत्सत्यत्वनिबन्धनं त्रिजगतां सत्यत्वमाभासतेयोऽयं दिव्यकरः प्रजाहितकृतेजागर्त्तिनित्यं विभुः। तं भक्तव्रजसौख्यदानधृतजीमूतव्रतं शाश्वतं लोकाधीशमहं व्रजामिशरणं सन्मङ्गलं श्रीरविम् ॥ ७७ ॥ सुत्राममुख्यैर्ध्रियतेसुरेन्द्रैर्यत्पादपद्मस्यरजः शिरोभिः। समृद्धिदं दुःखहरं जनानान्तं भानुमन्तं शरणं प्रपद्ये ॥७८॥ त्वत्पादपद्मं भजतां यदंशुमन् प्रभोविशेषेण करैः सुमङ्गलैः। दिनेदिने कृन्तसि पापसञ्चयं तत्मोच्चसेनाथ विकर्तनोजनैः ॥ ७९ ॥

४४८२
संस्कृतकाव्य ६७
CC-0 Pt. Chakradhar Joshi and Sons, Dey Prayag. Digitized by eGangotri

असत्सुकामं विषयेषुसक्तं दयाम्बुराशे सत
तंम्मनोमे । स्वलोचनापाङ्गनिरीक्षणेनविधे
हितत्वच्चरणानुरक्तम् ॥ ८० ॥ कृपयात
वैवदिनकरकर्त्तुं विरुद्धं भवन्ति सुसमर्थाः ।
लोकाः शुभकरमालिन् तत्र च मूलं त्व दंघ्रि
दृढभक्तिः ॥८१॥ वेदानांपर्य्यवसितमर्थं भक्तार्थ
सिद्धिकल्पतरुम् । वन्देजगदभिवन्द्यं कन्दंह्या
नन्दशाखिनां सूर्य्यम् ॥८२॥ गिरासहासौभ
गवाननन्तोह्यनन्तकालं तवयद्यनन्तान् । गा
येद्गुणांस्तर्ह्यपितत्समाप्तिं व्रजेन्नभास्वन्नितिनः
प्रतीतिः ॥ ८३ ॥ नानामतान्धतमसाकुलमी
शलोकमालोकभूतइहजाग्रतिवैत्वयीमम् । आ
लोकयश्रुतिशिरोमणिभूतमाद्यं त्वत्सारमाशुस
तमाद्यदयापयोधे ॥८४॥ नमोनमोऽनेकमता
ध्वपांथप्राप्तव्यभूम्नैतपसांविभूतये । ओजः स्व
रूपायनमोऽस्तुतुभ्यं वलात्मनेप्राणभृतां नमोन
मः॥ ८५ ॥ कुत्रापिकोपि हि कदापि जनः
स्तवन्तेच्छायापतेयदिसुभक्तियुतोविधत्ते । तं
सर्वगः परमकारुणिकस्त्वमाद्यसम्यक्प्रतो
षितदिहेशममप्रवृत्तिः ॥८६॥ येलोककान्ताः
प्रभयामहान्तोरूपैर्विचित्राजगतांपवित्राः ।

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

लोकव्यवस्थागुरवः कृपालोस्तेतेकरानः शुभदाभवन्तु॥ ८७॥ प्रसादकं नैकमपिस्तवं प्रभोनवेद्म्यहं यत्सहजाल्पबुद्धिः। तथापिनामाल्यपिगृह्णतेतवप्रसोदसीत्यस्तिमदीयबोधः॥८८॥ यस्यास्तितेचरणयोर्नरतिः स किंद्विजोयत्रास्तिनोस्मृतिरहस्करतेसकिं जपः। यत्रास्तिनोतवनिरीक्षणमस्ततन्द्रयाकामं दृशासुरपतेतदिहास्तिकिंतपः॥ ८९॥ अवश्यलभ्यमभीष्टमस्तिचेन्मनः शरण्यं भजतर्हिभास्करम्। यदाश्रितानां नहिचर्षणीनां स्वभीप्सितेच्छाविफलाभवन्ति॥ ९०॥ स्वयं सुतुष्टस्यतवेदृशीकथं स्तुतिर्भवेत्तोषकरीकृतामया। तथाप्यजल्पं पितरौसुभाषितं स्तनन्धयस्येवसुतोषयिष्यति॥९१॥ ममापराधान्द्युमणेपरःशतान्नतस्यतेपादयुगेक्षमस्व। निवारयासद्विषयेमनोगतिं त्वमेवयत्सर्वगतः प्रभुर्नः॥९२॥ यत्पादयुग्मजलजातपरागलेशप्राप्त्याविधूततमसोहतकिल्बिषौघाः। योगीश्वराः खलुलभन्तइहाणिमादीः सिद्धीस्तमंशुशरणंशरणंप्रपद्ये॥९३॥ संसारदुस्तरसरित्यतिवीचिमग्नानस्मान्समुद्धरदिनेशकरैरनन्तैः। एभिर्विभोकुविषयैर्मलि

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

नानिनस्त्वं चेतांसिनिर्मलतराणिविधेहिदीप्तया ॥९४॥ आयुःप्रवर्द्धयतिरोगगणान्विहन्तिकीर्तिंवितानयतिबुद्धिबलंददाति । ज्योतिर्गणेश भवदीयपदाब्जभक्तिः किङ्कंशुभं नहिनृणां विदधातिनित्यम् ॥९५॥ येषांत्वदंघ्रियुगलेसततं सुभक्तिर्नित्यं सुनिर्मलगुणान्तवये स्मरन्ति । ते सन्ति लोक इहधन्यतमादिनेशजन्मानिसन्तिसफलानिनृणां च तेषाम् ॥९६॥ नमोनमःकामदुघायभानवेकृपालवेदीधितिपेलवाय । शुकच्छदाभार्वयुजारथेनखं क्रामतेस्तात्मततं नमस्ते ॥९७॥ ते वैकृतार्थाः सुखिनःसुसम्मताविभोसतामाप्तसमस्तकामाः । तेषामलभ्यं नहि किञ्चिदीप्सितंपावीक्षतायेखलुतेकृपायाः॥९८॥ येषांत्वमीशखलुपूज्यतमः कुलेषु नित्यं त्वदंघ्रियुगलायबलिं वहन्तिये । येषां मनोनचविमुञ्चतितेंघ्रियुग्मं तेषां रजश्चरणयोः सततं पुनातुमाम् ॥ ९९॥ स्तवस्तवमुदावहःसततमेषभूयाद्विभोप्रसीदकरुणानिधेचरणोर्नते त्वं मयि । विधेहिमतिमुज्ज्वलान्दिनमणेत्वदंघ्र्योरतां मनोभिलषितावहोभवशुभांशुमालिन्सदा ॥ १००॥

इति श्रीउपासन्युपनामकगोपालशर्म्म विरचितं सूर्यशतकम् ॥ शुभम् ॥

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri

CC-0 Pt. Chakradhar Joshi and Sons, Dev Prayag. Digitized by eGangotri